योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १५३

त्रिपञ्चाशदधिकशततमः सर्गः १५३

अन्यमुनिरुवाच ।

आवयोश्चरतोस्तस्मिन्वने चिरतरं तपः ।

मृगानुसरणश्रान्तो मृगव्याध उपैष्यति ।। १

तं त्वं स्वभावपुण्याभिः कथाभिर्बोधयिष्यसि ।

तपस्तत्रैव विपिने स विरक्तश्चरिष्यति ।। २

ततस्तपस्विचर्याणामात्मज्ञानबुभुत्सया ।

मध्ये स स्वप्नजिज्ञासुः प्रक्ष्यति स्वप्नसंकथाम् ।। ३

कथयिष्यसि तस्मै त्वमात्मज्ञानमखण्डितम् ।

स्वप्नाख्येन प्रसङ्गेन सोऽतो योग्यो भविष्यति ।। ४

इत्यनेन प्रकारेण गुरुस्तस्य भविष्यसि ।

तेन तात मयोक्तोऽसि गिरा व्याधगुरो इति ।। ५

इति ते सर्वमाख्यातं यथायं संसृतिभ्रमः ।

यथाहं यादृशश्च त्वमिह यत्ते भविष्यति ।। ६

इति तेनाहमुक्तः सन्विस्मयाकुलया धिया ।

तेन सार्धं विमृश्यैतत्परं विस्मयमागतः ।। ७

अथ रात्र्यां व्यतीतायां स प्रभाते महामुनिः ।

तथा संपूजितो येन तत्रैव रतिमाप्तवान् ।। ८

अनन्तरं गृहे तस्मिंस्तस्मिन्ग्रामगृहे तथा ।

स्थितावावां स्थिरमती कृतभावौ परस्परम् ।। ९

ततो वहति कालोऽयमृतुसंवत्सरात्मकः ।

स्थितोऽहमागतान्भावांस्त्यजन्गृह्णन्गिरिर्यथा ।। १०

नाभिवाञ्छामि मरणं नाभिवाञ्छामि जीवितम् ।

यथा स्थितोऽस्मि तिष्ठामि तथैव विगतज्वरम् ।। ११

ततो विचारितं तत्र तन्मया दृश्यमण्डलम् ।

किं कारणमिदं तु स्यात्किमयं वेत्ति चेतसा ।। १२

कोऽयं पदार्थसंघातः किं नामैतस्य कारणम् ।

अस्त्यस्मिन्स्वप्नसंदर्शे चिद्व्योमैकस्वरूपिणि ।। १३

द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः ।

चिन्मात्रनभ एवैते कचन्त्यात्मन्यवस्थितम् ।। १४

चिच्चन्द्रिकाचतुर्दिक्कमवभासं तनोति यत् ।

तदिदं जगदाभाति चित्रमप्रतिघात्म खे ।। १५

नेमेऽद्रयो न चेयं भूर्नेदं खं नायमप्यहम् ।

चिन्मात्रव्योमकचनमिदमाभाति केवलम् ।। १६

पदार्थजातस्यास्य स्यात्किं नाम बत कारणम् ।

पिण्डग्रहे हेतुना तु विना कोऽप्यर्थसंभवः ।। १७

भ्रान्तिमात्रमिदं चेत्स्याद्भ्रान्तेः किं नाम कारणम् ।

द्रष्टा मन्ता च को भ्रान्तेः कारणं वा क्व कीदृशम् ।। १८

यस्याहमवसं संविन्मात्रकं हृदयौजसि ।

असौ मया सह गतः किलाशेषेण भस्मसात् ।। १९

तस्मादिदमनाद्यन्तं चिदाभामात्रमम्बरम् ।

अकर्तृकर्मकरणं रूपं चिद्घनमक्रमम् ।। २०

इदं चिद्व्योमकचनं घटावटपटादिकम् ।

स्फुटं कुत इवाकारि घटावटपटाद्यतः ।। २१

नापि चिन्मात्रकचनं चिन्मात्रं व्योम केवलम् ।

तस्य किं कचनं कीदृक् कथं कचति किं नभः ।। २२

अयं फेनश्चिदम्भोधेः किमस्य कचनं नवम् ।

कचत्स्वभाव एवायमनन्तश्चिद्घनः स्थितः ।। २३

चिन्मात्रकचनं शुद्धं ब्रह्म बृंहितचिद्घनम् ।

इदं जगदिवाभाति क्व दृश्यं द्रष्टृता कुतः ।। २४

आद्यन्तवर्जितममेयमनादिमध्य-

मेकं विभुं विगतकारणकार्यसत्त्वम् ।

सत्तामयं भुवनशैलदिगन्तनाना-

ऽनानात्मकं किमपि चेतनमेव सर्वम् ।। २५

इति श्रीवासिष्ठ० वा० दे० मो० निर्वा० उ० अवि० श० सर्वैकात्म्यप्रतिपादनं नाम त्रिपञ्चाशदधिकशततमः सर्गः ।।

१५३ ।।